GRETIL e-library

© 2008

**FILE**

Name: BhK814__Bharavi_Kiratarjuniya_ed_Khidirapore.pdf

PURL: http://resolver.sub.uni-goettingen.de/purl/?gr_elib-98

Type: Plain image PDF; index/bookmarks

Encoding: (no text)

Date: 9.3.2009

**BRIEF RECORD**

Author: Bhāravi

Title: Kirātārjunīya [with Mallinātha's Gaṇṭhāpatha]. [Ed. by Vidyākara Miśra and Bābū Rāma].

Publ.: Khidirapore : Saṃskṛta Press 1814

Description: 2, 220, 7 foll.

**FULL RECORD**

www.sub.uni-goettingen.de/ebene_1/fiindolo/gr_elib.htm

**NOTICE**

This file may be copied on the condition that its entire contents, including this data sheet, remain intact.

वृत्तस्य सुसहायस्य धीमतः । छायेवानुगता तस्य नित्यं श्रीः सहचारिणीति । कुलाभिमानी क्षत्रियत्वाभिमानी कुलीनत्वाभिमानी च त्वदन्यस्त्वत्तोऽन्यः अन्यारादित्यादिना पञ्चमी को नराधिपो गुणैः संध्यादिभिः सौन्दर्यादिभिश्चानुरक्तां सानुरागिणीं कुलजां कुलक्रमादागतां कुलीनाञ्च मनोरमां श्रियमात्मवधूमिव स्वभार्य्यामिव । वधूर्जाया स्नुषा चेत्यमरः । परैः शत्रुभिरपहारयेत्स्वयमेवापहारं कारयेदित्यर्थः । कलत्रापहारवल्लक्ष्म्यपहारोऽपि राज्ञामानहानिकरत्वादनुपेक्षणीय इति भावः ॥ ३१ ॥ *
अथ दशभिः कोपोद्दीपनं करोति । भवन्तमिति । हे नरदेव नरेन्द्र । एतर्हि इदानीमस्मिन्नापत्कालेऽपीत्यर्थः । एतर्हि सम्प्रतीदानीमधुना सांप्रतं तथेत्यमरः । इ

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः । परै
स्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥ ३१ ॥
भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि । कथं न म
न्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥ ३२ ॥

दमो र्हिलिति र्हिल्प्रत्ययः । एतेतोरथोरित्येतादेशः । आपदमेवाह । मनस्विगर्हिते शूरजुगुप्सिते वर्त्मनि मार्गे वर्तमानं शत्रुकृतान्दुर्दशामनुभवन्तमित्यर्थः । भवन्तमुदीरित उद्दीपितो मन्युः क्रोधः शुष्कं नीरसं शुषेः क इति निष्ठातकारस्य ककारः शमी चासौ तरुश्चेति विशेषणसमासः शमीग्रहणं शीघ्रज्वलनस्वभावत्वं उच्छिखः उन्नतज्वालः । घृणिज्वाले अपि शिखे इत्यमरः । वह्निरिव कथं न ज्वलयति ज्वलयितुमुचितमित्यर्थः । मितां ह्रस्व इति ह्रस्वः ॥ ३२ ॥ * ॥
नन्वन्तः शत्रुत्वादयं क्रोधस्त्याज्य एवेत्याशंक्याह । अवंध्येति । अवंध्यः कोपो यस्य तस्य अवंध्यकोपस्यात एवापदां विहन्तुर्निग्रहानुग्रहसमर्थस्येत्यर्थः पुंस इति शेषः

। तेजोबलेप्रभावेचज्योतिष्यर्चिषिरेतसीतिवैजयन्ती । जगत्लघयन् । लघू
कुर्वन्महानन्यतोऽन्यस्मात्गुरुत्वात् । भूतिं वृद्धिं नेच्छति । खलु नहि तेजस्विनः
परायत्तवृत्तित्वं युक्तं । मनुवचनन्तु अप्रभूरविषयमितिभावः । विशेषेणवक्ष्यमाण
सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ १८ ॥ * ॥

ननु युद्धात्पाक्षिको लक्ष्मीलाभः उपायान्तरैस्तु न तथेत्याशंक्याह । अभिमानइति
। अभिमानधनस्य वैरिनिर्य्यातनमेव धनं यस्येत्यर्थः । अतएवगत्वरैः गमनशीलैः अ
स्थिरैः । गत्वरश्चेतिक्वरवन्तो निपातः असुभिः प्राणैः । करणैः । पुंसि भूम्न्यसवः प्राणा
इत्यमरः । स्थास्नुं स्थिरं यशश्चिचीषतः । चेतुं संगृहीतुमिच्छतः । ग्लाजिस्थश्च
ग्स्नुरिति ग्स्नुप्रत्ययः चिनोतेः सन्नन्तात् शतृप्रत्ययः । अचिरं अंशवो यस्याः सा अचिरां

अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः । अचि
रांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम् ॥ १९ ॥

शुर्विद्युत्तस्याः विलासः स्फुरणन्तद्वच्चञ्चला क्षणिकाइत्यर्थः । लक्ष्मीः मन्यत् अनु
षङ्गादागतं आनुषङ्गिकं अन्वाचयशिष्टम्फलन्ननु । मानत्राणं अयः सएव मुख्य
म्फलं अभ्युदयस्तु लक्ष्मीरिति मानिनां मानएव श्लाघ्यइत्यर्थः । अत्रास्थिरप्राणत्या
गेनस्थिरयशः स्वीकाराभिधानात् न्यूनाधिकविनिमयाख्यः परिवृत्त्यलङ्कारः । उ
क्तञ्चकाव्यप्रकाशे । परिवृत्तिर्विनिमयोयोऽर्थानांस्यात्समासमैरिति ॥ १९ ॥ * ॥
नन्वल्पस्य मानस्य हेतोः कथम्प्राणत्यागः शक्यते कर्त्तुं यतो जीवन्नरोभद्राणि पश्यती
त्याशंक्याह । ज्वलितमिति । जनोभस्मना अयमाक्रन्दतिपादादिनाआक्रामति ।
अदाहकत्वादितिभावः । ज्वलितं ज्वलन्तं न्तु हरिन्नः मतिबुद्धीत्यादिसूत्रेचकाराद्व
र्त्तमानार्थत्वं हिरण्यं रेतोयस्यतंहिरण्यरेतसं अग्निं न आक्रन्दति । दाहकत्वा

आगमः । गत्यर्थेत्यादिना द्विकर्मकत्वम्परितः पटूज्ज्वलं एनसाम् । दह्यतेऽनेने
ति दहनं निवर्त्तकन्तथापि विलोकनक्षमन्दर्शनीयं वह्न्यादिविलक्षणमिति भावः ।
धाम तेजो बिभ्रत् ॥ ५५ ॥ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ ॥
सहसेति । पुनः सहसोपगतः अकस्मादागतः तपसां स्फूर्तिः प्रभवः आपदां अस्फूर्तिः
अप्रभवः निवर्त्तक इति यावत् । स मुनिर्व्यासः वपुष्मान् देहधारी पुण्यसञ्चयः पुण्य
राशिरिवेत्युत्प्रेक्षा जगतीभुजा राज्ञा सविस्मयन्ददृशे दृष्टः ॥ ५६ ॥ ❁ * ❁ * ॥
अथेति । अथ दर्शनानन्तरम् । उच्चैरुन्नतात्परार्द्ध्याच्छ्रेष्ठात् । अर्द्ध्याच्च परावरा

सहसोपगतः सविस्मयस्तपसां स्फूर्तिरस्फूर्तिरापदाम् । द
दृशे जगतीभुजा मुनिस्स वपुष्मानिव पुण्यसञ्चयः ॥ ५६ ॥
अथोच्चकैरासनतः परार्द्ध्यादुद्यन्स धूतारुणवल्कलाग्रः । रराज
कीर्णाकपिशांशुजालः शृङ्गात्सुमेरोरिव तिग्मरश्मिः ॥ ५७ ॥
अवहितहृदयो विधाय सोऽर्हामृषिवदृषिप्रवरे गुरूपदिष्टाम् ।
तदनुमतमलंचकार पश्चात्प्रशम इव श्रुतमासनन्नरेन्द्रः ॥ ५८ ॥

ध्र्मोत्तमपूर्वाच्चेति यत्प्रत्ययः । आसनतः सिंहासनादुद्यन्नुत्तिष्ठन् अत एव धूतानि
कम्पितान्यरुणानि वल्कलाग्राणि यस्य स तथोक्तः । स नृपः कीर्णं विस्तृतमाकपिश
मंशुजालं यस्य स तथोक्तः सुमेरोः शृङ्गादुद्यन्तिग्मरश्मिरिव रराज ॥ ५७ ॥ ❁ ॥
अवहितेति । स नरेन्द्रोऽवहितहृदयोऽप्रमत्तचित्तः सन् । चित्तन्तु चेतो हृदयं स्वा
न्तं हृन्मानसं मन इत्यमरः । ऋषिप्रवरे मुनिश्रेष्ठे । ऋषिवदृष्यर्हाम् । अर्हत्यर्थे
वतिप्रत्ययः । गुरूपदिष्टां शास्त्रीयामित्यर्थः । अर्हाम्पूजां । गुरोश्च हल इत्यकार
प्रत्ययः । विधाय पश्चादनन्तरन्तदनुमतन्तेनानुज्ञातमासनम्प्रशमः शान्तिः श्रु

विरमन्त्यानिवर्त्तमानया। व्याङ्परिभ्यो रमइतिपरस्मैपदम्। संध्ययाचापलेना स्थैर्य्येणयुवादित्वादण्प्रत्ययः। सुजनादितरोदुर्जनस्तस्यमैत्रीसख्यमनुविदधे अनुचक्रे। कर्मणिलिट्। यथादुर्जनमैत्रीसन्तमपिजहातितद्वत्संध्यापिसेवक ञ्जनमहासीदित्यर्थः। मित्रस्यकर्ममैत्रीअसन्तात्ङीप्। अत्रसंध्यादुर्जनमैत्र्यो श्चापलंसमानधर्मःअनुविधानमतएवार्थरूपेणेयमुपमा ॥ १० ॥ ❁✱✱✱❁ ॥ औषसेति। औषसात्प्राभातिकादातपाद्भयन्तस्मादिवेत्युत्प्रेक्षा। अपलीनंक्वचिद्गूढं वासरच्छवेरातपस्यविरमात्हेतोःपटीयःप्रभविष्णुतरमन्धयतीत्यन्धकारोध्वान्तं।

प्राङ्गुलावपिजनेनतमूर्द्धिं प्रेमतत्प्रवणचेतसिहित्वा। संध्या
यानुविदधेविरमन्त्याचापलेनसुजनेतरमैत्री ॥ १० ॥
औषसातपभयादपलीनंवासरच्छविविरामपटीयः। सन्नि
पत्यशनकैरिवनिम्नादन्धकारमुदवापसमानि ॥ ११ ॥
एकतामिवगतस्यविवेकःकस्यचिन्नमहतोप्युपलेभे। भास्व
तानिदधिरेभुवनानामात्मनीवपतितेनविशेषाः ॥ १२ ॥

अन्धकारोस्त्रियांध्वान्तमित्यमरः। अथसंध्यापगमनानन्तरंशनकैर्निम्नात्सन्निपत्या गत्यसमानिसमस्थलानिउदवापव्यानशे। अत्रप्रस्तुतान्धकारविशेषणसाम्यात् प्रस्तुतार्थप्रतीतेःसमासोक्तिरलंकारः। उत्प्रेक्षाचाङ्गःस्यात् ॥ ११ ॥ ❁❁❁❁ ॥ एकतामिति। एकतामभेदङ्गतस्येवतमोव्याप्यातथाप्रतीतेरियमुत्प्रेक्षा। महतः शैलादेरपिकस्यचिकस्यापिपदार्थस्यविवेकोभेदोनोपलम्भेनगृहीतः। अतएवोत्प्रे क्ष्यतेपतितेनास्तमितेनभास्वतासूर्येणभुवनानाम्भुवनस्यपदार्थानामित्यर्थः। वि शेषाभूधरादिभेदाःआत्मनिस्वस्मिन्नेवनिदधिरेइवनिहितारव। कथमन्यथानो

त्वम्। विश्राम्य नाम विश्रम्य किल श्रमापनयायेत्यर्थः। इति वक्ष्यमाणप्रकारां भारतीं व्याजहार उक्तवान्। व्याहार उक्तिर्लपितमित्यमरः॥ ९॥ ***॥

अथ प्रथमं तावन्मुनिवदेनं मुमुक्षुं कृत्वाऽऽह। त्वयेति। त्वया साधु समारम्भि सम्यगुपक्रान्तं रभेः कर्मणि लुङ्। कुतः यद्यस्मान्नवे वयसि यौवने तपश्चर्यं तदिति शेषः। तथाहि। अहमिव दृश्यन्ते मादृशो वर्षीयानतिवृद्धोऽपि। प्रियस्थिरेत्यादिना वृद्धशब्दस्य वर्षादेशः। प्रायो विषयैर्ह्रियन्ते आकृष्यन्ते किमु भवादृशो यवीयानिति भावः॥ १०॥

अथैवमनारम्भि तस्याकारलाभोऽपि विफलः स्यादित्याशयेनाह। श्रेयसीति। त

त्वया साधु समारम्भि नवे वयसि यत्तपः। ह्रियन्ते विषयैः प्रायो वर्षीयानपि मादृशः॥ १०॥ श्रेयसीतव सम्प्राप्ता गुणसम्पदमाकृतिः। सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम्॥ ११॥ शरदम्बुधरच्छायागत्वर्यो यौवनश्रियः। आपातरम्या विषयाः पर्यन्तपरितापिनः॥ १२॥

वाकृतिर्मूर्तिः रम्येति शेषः श्रेयसी श्रेष्ठा गुणसम्पत् तपः समारम्भरूपा प्राप्ताऽतो न निःफलेति भावः। न च त्वाकारवद्यास्य गुणाः कियन्तो न सन्तीति वाच्यमित्याह। लोक इति। लोके रम्यता रम्याकारता सुलभा गुणार्जनं गुणसम्पादनं दुर्लभं त्वयि तूभयं सम्पद्यत इति भावः॥ ११॥ **॥

यदुक्तं त्वया साधु समारम्भीति तदेव साधुत्वं संसारनिःसारताख्यापनाय युग्मेनोपपादयति। शरदिति। यौवनश्रियस्तावच्छरदम्बुधरच्छाया इव गत्वर्यः चञ्चलाः गत्वरश्चेति क्वरबन्तो निपातः टिड्ढाणञित्यादिना ङीप्। विषयाः शब्दादयस्तु आपातरम्यास्तत्काले रमणीयाः। तत्काले पात आपात इति वैजयन्ती। पर्यन्तेऽ

वंशेति । अहन्तु विद्विषांशत्रूणांसमुच्छेदेनविनाशेनकरणेनवंशलक्ष्मींअनु
द्धृत्यनिर्वाणंमोक्षमपिजयश्रियोन्तरायंविघ्नंमन्येनतुपुरुषार्थमित्यर्थः । किमुता
न्योत्सवादिकमितिभावः ॥ ६९ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥
नन्वयन्तेदुराग्रहइत्यतआह । अजन्मेति । पुरुषोयावदरिभिर्विलुप्तंसंहृतंय
शःइषुभिर्नादत्तेअरिवधेननप्रत्याहरतीत्यर्थः । तावदजन्मा अजातप्रायइत्यर्थः
। नन्वजातोपिजननानन्तरंमुपयुज्यतएवेत्यरुच्यापक्षान्तरमाह । गतासुर्मृतो
मृततुल्यइत्यर्थः । मृतोपिप्रागुपयुक्तवानित्यरुच्याह । तृणमेवेति । तत्तुल्यइत्य
र्थः । अकिञ्चित्करस्यत्रैकाल्यानुपयोगात्जीवन्मृतइत्यर्थः। अतोनाहमाग्रहंब्रवी

वंशलक्ष्मीमनुद्धृत्यसमुच्छेदेनविद्विषाम् । निर्वाणमपि
मन्येहमन्तरायञ्जयश्रियः ॥ ६९ ॥ अजन्मापुरुषस्ता
वद्गतासुस्तृणमेववा । यावन्नेषुभिरादत्तेविलुप्तमरिभि
र्यशः ॥ ७० ॥ अनिर्जयेनद्विषतांयस्यामर्षःप्रशाम्य
ति । पुरुषोक्तिःकथन्तस्मिन्ब्रूहित्वंहितपोधन ॥ ७१ ॥

मिकिन्तुवीरधर्ममनुपालयामीत्यर्थः ॥ ७० ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥
सर्वथावैरिनिर्यातनंकर्तव्यमित्युक्तन्तदकरणेपुरुषगुणानांहानिदोषमाह । अ
निर्जयेनेति । यस्यामर्षःक्रोधोद्विषतांशत्रूणामनिर्ज्जयेननिर्ज्जयंविनैवप्रशाम्य
ति । उपलक्षणेतृतीया । तस्मिन्कथंपुरुषइत्युक्तिःपुरुषशब्दःनकथञ्चित्प्रवर्त्तत
इतिशेषः । प्रवृत्तिनिमित्तस्यपुरुषकारस्याभावादितिभावः । हेतपोधनत्वंहि
त्वमेवब्रूहिकथय । नचतेकिञ्चिदविदितमस्तीतिभावः । हिहेताववधारणइत्य
मरः ॥ ७१ ॥ ❁ *** *** *** *** *** *** *** ❁ ॥

णाहिनाविशालेनविलसन्मरीचिनाप्रह्वमरकिरणेनशितिनानीलेनगलेनक
ण्ठेनोपलक्षितम् । कण्ठोगलोथग्रीवायामित्यमरः । अत्रोरगस्यस्वधवलिम
त्यागेननीलिमग्रहणात्तद्गुणालङ्कारः । तद्गुणःस्वगुणत्यागादन्योत्कृष्टगुणग्रहा
दितिलक्षणात् ॥ २३ ॥ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ॥

स्नुतेति । पुनश्चमालतीजातीकुसुमम् । सुमनामालतीजातिः । पुष्पेजातीप्रभृत
यःस्वलिंगाव्रीहयःफलइत्यमरः । तद्वत्सितंयत्कपालमेवकमुदन्तत्स्नुतंआप्लु
तंयेनतत्तथोक्तम् । अवरूढमूर्द्धजंव्याप्तशिरोरुहं । अतएवसुरसरित्पयसांशेष
मिवनिर्यातावशिष्टंगाङ्गमम्भइवस्थितमित्यर्थः । उत्प्रेक्षालङ्कारः । विसारिवि

स्नुतमालतीसितकपालकुमुदमुपरुद्धमूर्द्धजम् । शेषमिव
सुरसरित्पयसांशिरसाविकाशिशशिधामविभ्रतम् ॥ २४ ॥
बहुभिश्चबाहुभिरहीनभुजगबलयैर्विराजितम् । चन्दन
तरुभिरिवालघुभिःप्रबलायतैर्म्मलयमेदिनीभृतम् ॥ २५ ॥

स्त्वरंशशिधामशिरसाविभ्रतम्पुरुषन्ददर्शरितिपूर्वेणान्वयः ॥ २४ ॥ * * ॥
बहुभिरिति । अहीनांसर्प्पाणामध्येइनाःश्रेष्ठास्तएवबलयानियेषान्तैःसर्पा
भरणैरित्यर्थः । बहुभिःअनेकैर्बाहुभिःसहस्रभुजत्वात्तस्येतिभावः । विराजितंशो
भितञ्चन्दनतरुभिरनेकैर्मलयमेदिनीभृतमिवस्थितम् । चन्दनतरवोपिअहीना
महान्तोभुजङ्गास्तेषाञ्चयोवेष्टनंयेषान्तैरिति । अलघुभिःप्रबलाअतेआयताश्च
तैरुभयविशेषणम्प्रबलदीर्घैरित्यर्थः । अयवाअमलायतैरमलानिर्म्मलाश्चते
आयताश्चतेतैरूपमालङ्कारः ॥ २५ ॥ बहुटीकायामयंश्लोकोनास्तीत्यतोनव्याख्ये
यमित्यवधेयम् ॥ ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ ॥

लं शैलराजमभिभूयाक्रम्यकम्पयतीव पदविष्टम्भयातथाप्रतीयतइत्यर्थः। अत्रक म्पयतीवेत्युत्प्रेक्षागर्भोयंशैलकम्पनरूपकार्य्येणतत्कारणबलातिरेकसमर्थनात् कार्य्येणकारणसमर्थनरूपोऽर्थान्तरन्यासः॥ ८॥ ॥

किन्त्वयोयंशैलेमृगयाकलकलःश्रूयतेसोप्येतन्मायापरिकल्पितएवेत्याह। अय मिति। अयमेवशमस्थेशान्तिनिविष्टेनिरंध्रेमयि। अधिकरणविवक्षायांसप्तमी। माययाप्रहरिष्यन्प्रहर्तुमिच्छन्नित्यर्थः। ल्टइशेषेचेतिचकात्क्रियार्थाक्रियायां ल्टइशतृप्रत्ययः। मृगव्यमृगयातस्यसत्रंवनन्तदर्थंवनमित्यर्थः। तत्कामयतेइ तिमृगव्यसत्रकामोमृगयाभूमिपरिग्रहार्थीसन्निइत्यर्थः। कर्मण्यण् आखेटनंमृग

दनुजस्त्विदयंक्षपाचरोवावनजेनेतिबलम्बतास्तिसत्त्वे। अभि
भूयतथाहिमेघनीलःसकलङ्कम्पयतीवशैलराजम्॥ ८॥
अयमेवमृगव्यसत्रकामःप्रहरिष्यन्मयिमाययाशमस्थे। पृथु
भिर्ध्वजिनीरवैरकार्षीचकितोद्भ्रान्तमृगानिकाननानि॥ ९॥

व्यंस्यादाखेटोमृगयास्त्रियामित्यमरः। सत्रमाच्छादनेयज्ञेसदादानेवनेपिचेत्य मरः। पृथुभिर्बृहद्भिर्ध्वजिनीरवैस्सेनाकलकलैःस्वमाययाकल्पितैरेवेत्यर्थः। काननानिचकितोद्भ्रातात्रस्तामृगाःयेषुतानिचकार। अयंरंध्रान्वेषीमत्प्रहार र्थीस्वयमेवमृगयुर्भूत्वावनावरोधायसेनाघोषंकल्पयामास। समृगरूपेणागच्छ तीत्यर्थः॥ ९॥ ॥

वितर्कान्तरमाह। बहुशइति। अथवाबहुशःकृतासत्कृतिस्सत्कारोयेनतस्यसु योधनस्यप्रियंमद्वधरूपंविधातुङ्कर्तुमिच्छन्यःकश्चिदितिशेषः। वनंगोचरं स्थानंयेषान्तेषांवनगोचराणामभियोगादवरोधात्क्षुभितंआकुलन्तिरश्चाङ्गणंआ

थापिकिम्भवत्स्वामिसख्येनतत्राह । प्राप्स्यतइति । महीभृतासहसङ्गतेनत्वयास
कलन्तत्तपःफलम्प्राप्स्यते अतस्तेसखाऽस्मत्स्वामीयुक्तइत्यर्थः ॥ ५४ ॥ ❁✱❁ ॥
नन्वकिन्नुनःकुत्रोपयुज्यतेतत्राह । वाजीति । तस्यभूपतेःवाजिभूमिरश्वाकरःइ
भराजानांकाननञ्जोत्पत्तिस्थानंभूरिशोरत्ननिचयाश्चसन्तीतिशेषः । नन्वीदृ
गाढ्यःकिमेकस्मैकाञ्चनपत्रकाण्डायकलहायतेतत्राह । अस्यकाञ्चनेनसौवर्णेन
पत्रिणाशरेणकिमिवनकिञ्चित्प्रयोजनमस्तीत्यर्थः । परन्तुकेवलंविलङ्घनंव्यति
क्रमन्नसहते । नायंशरलुब्धःकिन्त्वाधिक्षेपासहिष्णुरित्यर्थः । अत्रप्रथमार्द्धेसमृ

जेतुमेवमभवतातपस्यतेनायुधानिदधतेमुमुक्षवः । प्राप्स्य
तेचसकलंमहीभृतासङ्गतेनतपसःफलन्त्वयाम् ॥ ५४ ॥
वाजिभूमिरिभराजकाननंसन्तिरत्ननिचयाश्चभूरयः । का
ञ्चनेनकिमिवास्यपत्रिणाकेवलन्नसहतेविलङ्घनम् ॥ ५५ ॥
सावलेपमुपलिप्सितेपरैरभ्युपैतिविकृतिंरजस्यपि । अर्थित
स्तुनमहान्समीहतेजीवितुङ्किमुधनन्धनायितुम् ॥ ५६ ॥

द्धिमद्वस्तुवर्णनादुदात्तालङ्कारः ॥ ५५ ॥ ❁❁ ॥ ✱✱ ॥ ❁❁ ॥ ✱✱ ॥
नन्वीदृग्लुब्धःकिमुपकर्त्तातत्राह । सावलेपमिति । महानयंरजस्यपिधूलावपिपरैः
सावलेपंसगर्वैरुपलिप्सितेरुपलब्धुमिष्टेजिघृक्षितेसतिविकृतिमभ्युपैति । प्रकुप्य
तीत्यर्थः । अर्थितोयाचितस्तुजीवितन्धनायितुन्धनीकर्तुंरक्षितुंवाजन्तातुमुन् । न
समीहतेनेोत्सहते । जीवितंयथात्मनोनेच्छतिकिन्त्वर्थितःप्रयच्छतीत्यर्थः । तर्हिध
नंकिमुधनमात्मनएधितुन्धनायितुमितिविग्रहः । अत्रइच्छामात्रमर्थः । अन्यथाध
नमित्यनेनपौनरुक्त्यंस्यात् । सुपआत्मनःक्यच् । अशनायोदन्यधनायाबुभुक्षापि

परीति । शिक्षालाघवलीलयाऽभ्यासपाटवातिशयेन हेतुनापरिमोहयमा णेनव्यामोहयता । अणावकर्मकाच्चित्तवत्कर्तृकादिति परस्मैपदे प्राप्तेनपाद मित्यादिनातत्प्रतिषेधादात्मनेपदेशानच्णौ विभाषेतिह्रस्वत्वस्यनस्यवाणत्वम् । पि नाकिनाहरेणाजिष्णोरर्जुनस्येयञ्जैष्णवीविशिखश्रेणीबाणसंहातःपरिजह्रेनि रस्ता ॥ ३६ ॥ ❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁ ॥

अवद्यन्निति । पाण्डवःअर्जुनःअवसायकैःअवसानकरैःस्यतेरण्यैतान्ण्वुल्प्रत्ययः । सायकैर्बाणैःशम्भोःपत्रिणःशरानवद्यन्खण्डयन् । द्यतेःशतृप्रत्ययःओतःश्यनी त्योकारलोपः । शिक्षयाशक्तुमुत्प्रभवितुमिच्छयाउत्साहेनेत्यर्थः । अथरणेशिक्षया

परिमोहयमाणेनशिक्षालाघवलीलया । जैष्णवीविशिखश्रेणीपरिजह्रे पिनाकिना ॥ ३६ ॥ अवद्यन्पत्रिणःशम्भोःसायकैरवसायकैः । पाण्ड वःपरिचक्रामशिक्षयारणशिक्षया ॥ ३७ ॥ चारचुंचुश्चिरारेचीचंचच्ची ररुचारुचः । चचाररुचिरःचारुचारैराचारचंचुरः ॥ ३८ ॥ द्व्यक्षरः ॥

ऽभ्यासेनपरिचक्रामउत्साहनैपुण्याभ्यांसञ्चचारेत्यर्थः ॥ ३७ ॥ ❁❁❁❁ ॥

चारैरिति । चारैर्गतिविशेषैर्वित्तइतिचारचुञ्चुः । तेनवित्तःचुञ्चुप्चणपाविति चुञ्चुप्प्रत्ययः । चिरमारेचयतिरिक्तीकरोतिशत्रूनितिचिरारेची । चञ्चतःचल तःचीरस्यवल्कलस्यरुचाप्रभयारोचतइतिरुचःशोभमानः । इगुपधेतिकः । रुचि रःसुन्दरःचंचूर्यतेभृशंचरतीतिचञ्चुरः । चरतेर्यङ्लुगन्तात्पचाद्यच् । चरफ लोश्चेतिनुमागमःयङःचिचेतियङोलुक् । आचारस्ययुक्तव्यवहारस्यचञ्चुरःभृश माचरितःसमुनिःचारुयथातथाचारैःगतिविशेषैःचचार । चारःपियालवृक्षस्तस्मात्त नौबन्धापसर्पयोरितिविश्वः । द्व्यक्षरः ॥ ३८ ॥ ✳❁✳❁✳❁✳❁✳ ॥

सरित्सन्निपातिनीः । कर्त्तर्युपमानादिति णिनिः । अपोजलानिप्रसक्तं अनुबन्धं अवि
च्छिन्नं यथातथामुमुचुः । इतःप्रभृतिवंशस्थवृत्तम् ॥ ५५ ॥

परा हतेति । पराहताः अभिहताः अतोध्वस्तानिर्वापिताःशिखाज्वालायस्यतस्मिन्परा
हतध्वस्तशिखे । अधिक्षिप्तं प्रहारितंनाशितन्ताडितमितियावत् । अतःसमिद्धं ज
टितिप्रदीप्तन्तेजोयस्यतस्मिन्शिखावतोग्नेःवपुषिप्रतप्ते आयसिलोहेइवक्षतास्प
दाक्षतस्थितयः । आस्पदंप्रतिष्ठायामितिनिपातःप्रथमेपयोनिपाताःजलपाताध्व
निंवितेनिरेविस्तारयामासुः ॥ ५६ ॥

पराहतध्वस्तशिखेशिखावतोवपुष्यधिक्षिप्तसमिद्धतेजसि । क्षता
स्पदास्तप्तइवायसिध्वनिम्पयोनिपाताःप्रथमेवितेनिरे ॥ ५६ ॥
महानलेभिन्नसिताभ्रपातिभिःसमेत्यसद्यःक्कथनेनफेनताम् । व्र
जद्भिरार्द्रेन्धनवत्परिक्षयञ्जलैर्वितेनेदिविधूमसन्ततिः ॥ ५७ ॥
सकेतुभिःपाण्डुरनीलपाटलैःसमागताःशक्रधनुःप्रभाभिदः । असं
स्थितामादधिरेविभावसोर्विचित्रचीनांशुकचारुतांत्विषः ॥ ५८ ॥

महानलइति । महानलेऽग्नेभिन्नानिखण्डितानिसिताभ्राणीवपतन्तीतिभिन्नसि
ताभ्रपातिभिः । कर्त्तर्युपमानादितिणिनिप्रत्ययः । अतएवसद्यःक्कथनेनपाकेनफे
नताम्प्राप्यसमेत्यपरिक्षयंनाशंव्रजद्भिःजलैःआर्द्रेन्धनवत्आर्द्रकाष्ठैस्तुल्यम् । तेन
तुल्यंक्रियाचेद्वतिरितिवतिप्रत्ययः । दिविगगनेधूमसन्ततिः । वितेनेविस्तारिता
फेनादिकमार्द्रेन्धनेपितुल्यम् ॥ ५७ ॥
सकेतुभिरिति । पाण्डुरैःनीलैःपाटलैश्चपाण्डुरनीलपाटलैःविचित्रैःसकेतुभिःधू
मैःसमागताःसङ्गताःअतएवशक्रधनुषःप्रभाभिदोद्युतिभाजःविभावसोरग्नेःत्वि

यत्नमपिनद्वेष्टियतइतिभावः । अगोचरे अवाङ्मानसगोचरेब्रह्मणिवागिव ।
यतोवाचोनिवर्तन्ते अप्राप्यमनसासहइतिश्रुतेरितिभावः । शराणांशक्तिःशिति
कण्ठकायेशिवशरीरेऽपरमेउपरता । तस्याक्षोभ्यमहिमत्वादितिभावः । विभा
यासकर्मकादितिविकल्पादात्मनेपदम् । अत्रमालोपमा ॥ ११ ॥ ❀❀ ❀❀ ॥
उमेति । पाण्डुसुतेनप्रणुन्नाःप्रक्षिप्ताःशिलीमुखाबाणाःउमापतिंशिवंअभ्युत्थित
स्याभ्युन्नतस्याद्रिपतेर्नितम्बङ्कटकंहेमन्तभवस्यहैमनस्य । सर्वत्राण्तलोपश्चेत्यण्
प्रत्ययःतकारलोपश्च । अर्कस्यपादारश्मयइव । पादारश्म्यङ्घ्रितुर्यांशाइत्यम

सद्वादितेवाभिनिविष्टबुद्धौगुणाभ्यसूयेवविपक्षपाते । अगो
चरेवागिवचोपरेमेशक्तिःशराणांशितिकण्ठकाये ॥ ११ ॥
उमापतिम्पाण्डुसुतप्रणुन्नाःशिलीमुखानव्यथयांबभूवुः । अ
भ्युत्थितस्याद्रिपतेर्नितम्बमर्कस्यपादाइवहैमनस्य ॥ १२ ॥
सम्प्रीयमाणानुबभूवतीव्रम्पराक्रमन्तस्यपतिर्गणानाम् । वि
षाणभेदंहिमवानसह्यंवप्राननतस्येवसुरद्विपस्य ॥ १३ ॥

रः । नव्यथयांबभूवुः । मध्येस्थितस्यांसुमतांसमूहमर्कस्येतिपाठान्तरेमध्येस्थि
तस्यहैमनस्यार्कस्यपादाःकिरणाःअंसुमतांप्राणिनांसमूहमिवेतिनदुःखमुत्पा
दयामासुरिति ॥ १२ ॥ * ❀ * ❀ * ❀ * ❀ * ❀ * ❀ * ❀ * ❀ ॥
सम्मिति । गणानाम्पतिःशिवःतीव्रन्तस्यार्जुनस्यपराक्रमंवप्रेरोधसिआनतस्यपरि
णतस्यवप्रप्रहारिणइत्यर्थः । सुरद्विपस्यासह्यंविषाणभेदन्दन्तप्रहारंहिमवा
निवसंप्रीयमाणःसंहृष्यन्अनुबभूवानुभवतिस्म । तस्याक्षोभ्यत्वादनुजिघृक्षुत्वा
च्चेतिभावः ॥ १३ ॥ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ॥

काबभूवुः ॥ ३३ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

अस्त्रैरिति । अस्त्रैःस्वायुधैःसमानान्तुल्यामतिरेकिणींततोऽधिकाम्वातस्यमुनेः रिपूणामपिशक्तिंपश्यन्विषादेनोत्साहभङ्गेनवक्तव्यानिनिर्वाच्यानिवलानियस्यसः प्रमाथीशत्रुमर्दनःइन्दुमौलिःमहादेवःस्वबलमात्मीयंबलमालम्बेसामर्थ्यमव लम्बितवान् ॥ ३४ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

ततइति । ततोमहिमाप्रदुर्भावानन्तरंदेवःतपोवीर्य्याभ्यांसमुद्धतस्यप्रगल्भस्य समरएवार्णवस्तस्यपारमन्तंयियासोर्जिगमिषोर्जिष्णोरर्ज्जुनस्याखिलानिम

अस्त्रैस्समानामतिरेकिणींवापश्यन्रिपूणामथतस्यशक्तिम् ।
विषादवक्तव्यबलःप्रमाथीस्वमाललम्बेबलमिन्दुमौलिः ॥ ३४ ॥
ततस्तपोवीर्य्यसमुद्धतस्यपारंयियासोःसमरार्णवस्य । महे
षुजालान्यखिलानिजिष्णोरर्कःपयांसीवसमाचचाम ॥ ३५ ॥
रिक्तेसविस्रम्भमथार्ज्जुनस्यनिषङ्गवक्त्रेनिपपातपाणिः । अ
न्यद्विपापीतजलेसतर्षंमतङ्गजस्येवनगाश्मरन्ध्रे ॥ ३६ ॥

हेषुजालानिसमग्रवाणसमूहानर्कःसूर्य्यःपयांसीवजलानीवसमाचचामसंज हारेत्यर्थः ॥ ३५ ॥ * ❁ ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ॥

रिक्तइति । अथवाणान्तर्द्धानानन्तरंअर्ज्जुनस्यपाणिःकरःरिक्तेवाणशून्येपिनि षङ्गवक्त्रेतूणीरमुखेअन्यद्विपेनगजान्तरेणपीतजलेपीततोयेनगस्याचलस्या श्मरन्ध्रेशिलागर्त्तेप्रदरइत्यर्थः । सतर्षंसतृष्णंयथास्यात्तथेतिक्रियाविशेषणम् । मतङ्गजस्यपाणिःलक्षणयाकरइवसविस्रम्भंसन्त्येववाणाइतिसविश्वासन्निपपा त ॥ ३६ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

ततइति। ततोमुनिमुष्टियुद्धानन्तरंउदयेमहतिद्विरदेगजेइवभीमेभुजावे
वायुधेयस्यतथाभूतेरणमुपेयुषिमुनौशङ्करःस्वयमपिसवाणाधिसतूणांधनुर
पास्यत्यक्त्वामुष्टिभिर्घनैःलोहमुद्गरैरिवप्रतिजघानप्राङ्मुनिकृताघातस्यप्रतिघातं
कृतवानित्यर्थः। घनाःकठिनसंघातमेघकाठिन्यमुद्गराइतिवैजयन्ती। घनस्तु
लोहमुद्गरइतिविश्वः। यद्यपिमुष्टिशब्दोमुष्ट्यानुबद्धया। सरत्निःस्यात्त्वरत्नि
स्तुनिष्कनिष्ठेनमुष्टिनाइत्यमरेउभययथाप्रयोगाद्द्विलिङ्गः। तथाप्यत्रोपमान
सारूप्यात्पुंल्लिङ्गोग्राह्यः। द्रुतविलंबितवृत्तम्॥१॥ ॥

ततउदयइवद्विरदेमुनौरणमुपेयुषिभीमभुजायुधे। धनु
रपास्यसवाणधिशङ्करःप्रतिजघानघनैरिवमुष्टिभिः॥१॥
हरपृथासुतयोर्ध्वनिरुत्पतन्नमृदुसंवलिताङ्गुलिपाणिजः। स्फु
टदनल्पशिलारवदारुणःप्रतिननाददरीषुदरीभृतः॥२॥
शिवभुजाहतिभिन्नपृथुक्षतीःसुखमिवानुबभूवकपिध्वजः। क
इवनामवृहन्मनसाम्भवेदनुकृतेरपिसत्त्ववतांक्षमः॥३॥

हरेति। हरपृथासुतयोरमृदुनिविडंयथातथासंवलिताःसंघट्टिताः। अङ्गुलयो
येषान्तेमुष्टिकृताइत्यर्थः। तेषुपाणिषुजातस्तथोक्तःस्फुटन्तीनांविदलन्तीनाम
नल्पशिलानामारवइवदारुणोभीषणोध्वनिरुत्पतन्उद्गच्छन्। दरीभृतोगिरेः
दरीषुगुहासुप्रतिननादप्रतिदध्वान॥२॥ ॥
शिवेति। कपिध्वजःशिवस्यभुजाहतिभिर्मुष्टिघातैर्भिन्नाविदीर्णाःयाःपृथवोम
हान्तःक्षतयःप्रहाराःव्रणाःताःसुखमिवानुबभूवदुःखकरोपीतिभावः। क्षतिदुःखन्ना
गणयदित्यर्थः। ननुदुस्सहदुःखवेगेषुकथमगणनेत्यत्राह। कइति। कइ

अथेति । अथहिमरुचिनाहिमशुभ्रेणभस्मनाभूषितंशिरसीन्दुलेखयाविराजितं शोभितंअतिमनोहरंसुन्दरंस्ववपुर्देधतम् । किरातरूपंविहायनिजविग्रहन्द धानंहरमुदीक्ष्यपाण्डवोननामप्रणतवान् । प्रमुदितवदनावृत्तम् । प्रमुदितव दनाभवेन्नौररावितिलक्षणात् ॥ १५ ॥ ॥

सहेति । वृषभस्येवगतिर्यस्यसोऽर्जुनःतस्मिन्समयेसहशरधिभ्यांवर्ततइतिस हशरधि । वोपसर्जनस्येतिविकल्पात्सहशब्दस्यसभावः । निजंकार्मुकङ्गाण्डीव न्तथैवपूर्ववदेव । संवर्मितंसम्यक्कवचितंअतनुमहत्निजंवपुः । तथैवनिहितं

अथहिमशुचिभस्मभूषितंशिरसिविराजितमिन्दुलेखया । स्व
वपुरतिमनोहरंहरन्दधतमुदीक्ष्यननामपाण्डवः ॥ १५ ॥
सहशरधिनिजन्तथाकार्मुकंवपुरतनुतथैवसम्वर्मितं । निहि
तमपितथैवपश्यन्नसिंवृषभगतिरुपाययौसविस्मयम् ॥ १६ ॥
सिषिचुरवनिमम्बुवाहाःशनैःसुरकुसुमभियायचित्रंदिवः । वि
मलरुचिभृशन्नभोदुन्दुभेर्ध्वनिरखिलमनाहतस्यानशे ॥ १७ ॥

यथापूर्वंस्थापितम् । असिमपिखड्गञ्चपश्यन्विस्मयमुपाययौ । क्वचित्तुवृषभग तिमितिपाठःतत्रवृषभगतिंशिवञ्चपश्यन्विस्मयंययावित्यर्थः ॥ १६ ॥ ॥

सिषिचुरिति । अंबुवाहाःशनैरवनिंसिषिचुःउक्षाञ्चक्रुःदिवोन्तरिक्षाच्चित्रंविचि त्रंसुरकुसुममन्दारकुसुमानिजातावेकवचनंइयायआजगामआहतस्यताडित स्यदुन्दुभेःजातावेकवचनम् । ध्वनिश्शब्दोविमलरुचिप्रसन्नमखिलन्नभोभृशमा नशेव्याप । अताडिताएवदुन्दुभयोनेदुरित्यर्थः । सर्वमिदमस्यसर्वलोकहितार्थ त्वादितिवेदितव्यम् ॥ १७ ॥ ॥

संसेवन्तइति। दानशीलंस्वभावेनिजधर्मोयेषान्तेदानशीलास्त्वामेवोपदिश्यदानंकुर्वन्तोइत्यर्थः। तस्माद्दानंपरमंवदन्तीतिश्रुतेरितिभावः। कुतोयतोजन्मदुःखंसम्पश्यन्तोऽनुभवन्तःपुमांसःविमुक्त्यैमोक्षायसंसेवन्तेभवन्तमितिशेषः। नचतच्चिन्तंफलार्थित्वादितिभावः। किन्तुनिःसङ्गोनिःस्पृहस्त्वंदानतेभ्यःतत्तेभ्यःफलंसफलंददासीतियत्तत्केवलन्निरुपाधिकङ्कारुण्यङ्करुणा। स्वार्थेष्यञ्। कारुण्यंकरुणाघृणेत्यमरः। नस्वकार्य्यंएतदेवचित्रंकेवलम्परार्थत्वादितिभावः। मालिनीवृत्तम्॥२४॥ ❁✱❁ ❁✱❁ ❁✱❁ ❁✱❁ ❁✱❁॥ प्राप्यतइति। यत्तीर्थमिहास्मिन्लोकेदूरंअगत्वाप्राप्यतेस्मृतिमात्रसुलभमित्यर्थः

संसेवन्तेदानशीलाविमुक्त्यैसंपश्यन्तोजन्मदुःखम्पुमांसः। यन्निः
सङ्गस्त्वम्फलस्यानतेभ्यःतत्कारुण्यंतेकेवलंनस्वकार्यम्॥२४॥
प्राप्यतेयदिहदूरमगत्वायत्फलत्यमरलोकगताय। ती
र्थमस्तिनभवार्णववाह्यंसार्वकामिकमृतेभवतस्तत्॥२५॥

। गङ्गादिकन्तुनतथेतिभावः। यत्तीर्थममरलोकगतायफलतिफलम्प्रयच्छति। अत्रापीतिस्मरणमात्रादेवेतिभावः। भवःसंसारःसएवार्णवःततोवाह्यंवहिर्भवंसंसारातीतंमोक्षप्रदमित्यर्थः। वहिर्देवपञ्चजनेभ्यइतिवक्तव्यमितियञ्प्रत्ययः। सर्वेकामाःप्रयोजनमस्येतिसार्वकामिकम्। तदस्यप्रयोजनमितिठक्। तादृक्तरन्त्यनेनेतितीर्थन्तारकम्भवतःत्वदृते। अन्यारादित्यादिनापञ्चमी। अन्यन्नास्ति। औपच्छन्दसिकंवृत्तम्॥२५॥ ✱❁✱❁✱❁✱❁✱❁✱❁✱❁॥ व्रजतीति। हेवरदत्वयिप्रीतिमान्नरःशुचिनिर्मलम्पदङ्कैवल्यंमुक्तिंव्रजति। मुक्तिःकैवल्यनिर्वाणेत्यमरः। प्रतिहतमतिरुपहतबुद्धिःत्वद्द्वेषीत्यर्थः। घोरांगति

| ॥कि०ख०॥ | पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|---|
| ॥शु०प०॥ | १७ | १ | ६ | दपीच्छा | दपीच्छां |
| ॥ १ ॥ | १७ | १ | ८ | यदा | पदा |
| | १८ | १ | ६ | स्वन्ता | मस्वन्ता |
| | २१ | १ | ८ | मभिमाने | मभियाने |
| | २१ | १ | ११ | किमपेक्ष्य | किमवेक्ष्य |
| | २१ | १ | १४ | वृद्धि | वृद्धिं |
| | २१ | २ | ६ | न्निङ्० निङ् | लिङ्० लिङ् |
| | २१ | २ | १८ | निगरेणेन | निगरणेन |
| | २२ | २ | ३ | अनपा | नअपा |
| | २३ | १ | १ | इत्थ | इत्थं |
| | २३ | १ | ७ | आवितृप्त | अवितृप्त |
| | २४ | २ | २ | अगमः | आगमः |
| | २४ | २ | ५ | श्लोघ्य | श्लाघ्य |
| | २४ | २ | १९ | उपायातह | उपायाहत |
| | २४ | २ | २० | न्तर्थःर्थी | न्तीग्यर्थः |
| | २५ | १ | १५ | लिट् | लट् |
| | २५ | २ | १२ | रक्षा० त्कलां | रक्ष्या० त्कलाः |
| | २५ | २ | १७ | रक्षा | रक्ष्या |
| | २६ | १ | ७ | वाशरीरे | चाशरीरे |
| | २६ | २ | ५ | आपायो | अपायो |
| | २६ | २ | ७ | निशान | निशामन |

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| ३० | २ | १४ | ज्ञधामा | ज्ञपृधामि |
| ३१ | २ | ७ | प्रयोन | प्रयोजन |
| ३१ | २ | २० | द्वैयापनेन | द्वैपायनेन |
| ३२ | १ | २ | वक्षमाण | वक्ष्यमाण |
| ३२ | १ | ७ | वेतो ० ङीप् | वोतो ० ङीष् |
| ३२ | १ | ८ | समाधय | समाधाय |
| ३२ | २ | ४ | राज्ञा | राज्ञः |
| ३२ | २ | ६ | मगुणात्व | मगुणत्व |
| ३२ | २ | ११ | कार्णा | कर्णा |
| ३२ | २ | २० | म्प्रकाश | म्प्रकाशन |
| ३३ | २ | २ | चेति | वेति |
| ३४ | १ | १४ | र्घस्र ० घस्रा | घस्लृ ० घस्लृश्चा |
| ३३ | २ | १ | मृरत्यु | मृत्युर |
| ३४ | २ | ७ | शेमंथि | रोमंथ |
| ३४ | २ | ८ | क्यप् | क्यङ् |
| ३५ | १ | ३ | स्रत | स्रन |
| ३५ | १ | ६ | सदस | सदवस |
| ३५ | २ | १८ | सत्प्रसयः ० वक्ष | शत्रादेशः ० वक्ष्य |
| ३६ | १ | ३ | प्रसन्नये | प्रसत्तये |
| ३६ | १ | १० | प्रसन्नये | प्रसत्तये |
| ३६ | २ | ११ | हृयो | ह्रेया |

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| १०२ | २ | १२ | प्राणाय | प्रणाय |
| १०३ | २ | १ | भ्रूलास | भ्रूविलास |
| १०४ | १ | ८ | विशेणाय | विशेषणा |
| १०४ | १ | १३ | आर्था | अर्था |
| १०७ | १ | १७ | तेषांध्वन्वनि | तेषांध्वनि |
| १०७ | १ | २० | वित्रत्तिमियाप | विवृत्तिमियाय |
| १०७ | २ | २ | भवद्भिदो | भवद्भिर्दो |
| १०९ | १ | १७ | पुथुस्तनी | पृथुस्तनी |
| १११ | १ | १३ | न्नर्ज्जयम् | न्नर्ज्जयन् |
| १११ | २ | १६ | अवन्तप | अनन्तप |
| ११२ | २ | ६ | गुरुमि | गुरुभि |
| ११३ | २ | ६ | कुमुदघन | कुमुदवन |
| ११४ | १ | २० | प्रायुः | प्रापुः |
| ११४ | २ | ७ | पयौ | ययौ |
| ११५ | १ | १३ | व्युह्योवेति | व्युह्योर्वेति |
| ११५ | २ | १५ | नुमागमः | नुगागमः |
| ११६ | १ | १९ | अरुमेन | अनुन्मन |
| ११६ | २ | ७ | क्रतिये | क्रतियैं |
| ११९ | १ | १६ | मुनेर्मान | मुनेर्म्मौन |
| १२१ | २ | २ | अनवा | अनव |
| १२३ | २ | १५ | आविज्ञाते | अविज्ञाते |
| १२३ | २ | २० | वृ त्रास | वृत्रास |

